# Lesson 27: Bhagavad Gītā Pages 390 - 392

20. सञ्जयः उवाच । अथ व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा शस्त्र-संपाते प्रवृत्ते कपि-ध्वजः पाण्डवः धनुः उद्यम्य...

21. तदा इदं वाक्यं हृषीकेशं आह महीपते । “अच्युत सेनयोः उभयोः मे रथं स्थापय ।

22. यावद् एतान् अवस्थितान् योद्धु-कामान् अहं निरीक्षे । अस्मिन् रण-समुद्यमे कैः सह मया योद्धव्यम् ।

23. ये एते दुर्बुद्धेः धार्तराष्ट्रस्य युद्धे प्रिय-चिकीर्षवः अत्र समागताः (तान्) योत्स्यमानान् अहम् अवेक्षे ।”

24. भारत गुडाकेशेन एवम् उक्तः हृषीकेशः सेनयोः उभयोः मध्ये रथोत्तमं स्थापयित्वा...

25. भीष्म-द्रोण- सर्वेषां च महीक्षितां प्रमुखतः “पार्थ एतान् समवेतान् कुरून् पश्य” इति उवाच ।

26. तत्र पार्थः स्थितान् पितॄन् अथ पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् तथा सखीन्...

27. श्वशुरान् सुहृदः च एव सेनयोः उभयोः अपि अपश्यत् । कौन्तेयः तान् सर्वान् अवस्थितान् बन्धून् समीक्ष्य...

28. परया कृपया आविष्टः विषीदन् इदम् अब्रवीत् । अर्जुनः उवाच । कृष्ण इमान् युयुत्सून् समवस्थितान् स्वजनान् दृष्ट्वा...

29. मम गात्राणि सीदन्ति मुखं च परिशुष्यति । मे शरीरे वेपथुः च रोमहर्षः च जायते ।

30. हस्तात् गाण्डीवं स्रंसते त्वक् च परिदह्यते एव । अवस्थातुं च न शक्नोमि मे मनः च भ्रमति इव ।

31. केशव विपरीतानि च निमित्तानि पश्यामि । आहवे स्वजनं हत्वा च न श्रेयः अनुपश्यामि ।

32. कृष्ण विजयं न कांक्षे न च राज्यं सुखानि च । गोविन्द राज्येन नः किं भोगैः जीवितेन वा किम् ।

33. येषाम् अर्थे राज्यं भोगाः सुखानि च नः कांक्षितं ते एव सुदुस्त्यजान् प्राणान् त्यक्त्वा नः योद्धुं स्थिता ।

34. आचार्याः पितरः पुत्राः तथा एव च पितामहाः मातुलाः श्वशुराः पौत्राः स्यालाः तथा संबन्धिनः ।

35. मधुसूदन घ्नतः अपि एतान् हन्तुं न इच्छामि त्रैलोक्य-राज्यस्य हेतोः अपि किं नु महीकृते ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, ger = gerund, inf = infinitive, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva

36. जनार्दन धार्तराष्ट्रान् निहत्य नः का प्रीतिः स्यात् । एतान् आततायिनः हत्वा पापम् एव अस्मान् आश्रयेत् ।

37. तस्मात् धार्तराष्ट्रान् सबान्धवान् वयं हन्तुं न अर्हाः । माधव स्वजनं हि हत्वा सुखिनः कथं स्याम ।

38. यद्यपि एते लोभ-उपहत-चेतसः कुल-क्षय-कृतं दोषं मित्र-द्रोहे च पातकं न पश्यन्ति...

39. जनार्दन कुल-क्षय-कृतं दोषं प्रपश्यद्भिः अस्माभिः अस्मात् पापात् निवर्तितुं कथं न ज्ञेयम् ।

40. कुल-क्षये सनातनाः कुल-धर्माः प्रनश्यन्ति । धेर्मे नष्टे अधर्मः कृत्स्नं कुलं अभिभवति उत ।

41. कृष्ण अधर्म-अभिभवात् कुल-स्त्रियः प्रदुष्यन्ति । वार्ष्णेय स्त्रीषु दुष्टासु वर्ण-संकरः जायते ।

42. संकरः कुलघ्नानां कुलस्य च नरकाय एव । एषां हि लुप्त-पिण्ड-उदक-क्रियाः पितरः पतन्ति ।

43. एतैः वर्ण-संकर-कारकैः दोषैः कुलघ्नानां शाश्वताः जाति-धर्माः कुल-धर्माः च उत्साद्यन्ते ।

44. जनार्दन "उत्सन्न-कुल-धर्माणां मनुष्याणां नरके नियतं वासः भवति" इति अनुशुश्रुम ।

45. अहो बत वयं महत् पापं कर्तुं व्यवसिताः यद् राज्य-सुख-लोभेन स्वजनं हन्तुं उद्यताः ।

46. यदि शस्त्र-पाणयः धार्तराष्ट्राः अप्रतीकारम् अशस्त्रं मां रणे हन्युः तद् मे क्षेमतरं भवेत् ।

47. सञ्जयः उवाच । संख्ये एवं उक्त्वा सशरं चापं विसृज्य शोक-संविग्न-मानसः अर्जुनः रथ-उपस्थे उपाविशत् ।

Abbreviations: P = parasmaipada, A = ātmanepada, p- = passive, c- = causative, pres = present, imperf = imperfect, opt = optative, fut = future, perf = perfect, imper = imperative, ger = gerund, inf = infinitive, PPP = Past Passive Participle, PrAP = Present Active Participle, PrPP = Present Passive Participle, gerv = gerundive, TP = tatpuruṣa, KD = karmadhāraya, BV = bahuvrīhi, & = dvandva